"येन बद्धो बलीराजा दानवेन्द्रो महाबलः। तेन त्वामपि बध्नामि रक्षे! मा चल मा चल"। "ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैरन्यैश्च मानवैः कर्त्तव्यो रक्षणाचारो द्विजान् संपूज्य शक्तितः" इति।

**तन्तुभ** पु॰ तन्तुना सन्तत्या भाति भा—क। १सर्षपे २वत्से च जटाधरः। "मरीचं पिप्पलं कोषं जीरकन्तन्तुभं तथा। संस्कारे च समक्षे च महादेव्यै निवेदयेत्" कालि॰ पु॰। "तन्तुभं सर्षपम्" रघुनन्दन।

**तन्तुवर्द्धन** त्रि॰ तन्तुं सन्तानं संसारं वा वर्द्धयति छिनत्ति वा वृध—वृद्धौ णिच् ल्यु वर्द्ध छेदने ल्यु वा। १तन्तुवर्द्धके २तन्तुच्छेदके च। ३परमेश्वरे पु॰। "शुभाङ्गो लोकसारङ्गः सुतन्तुस्तन्तुवर्द्धनः" विष्णु स॰। "तन्तुं सन्ततिं संसारं वर्द्धयति छेदयति वा ज्ञानदानेन" भा॰।

**तन्तु(र)ल** न॰ तन्तुर्विद्यतेऽस्य र-लच् वा। मृणाले। हेमच॰

**तन्तुवाप** त्रि॰ तन्तून् वपति वप-अण् उप॰स॰। (ताँति) तन्तुवाये जटाधरः।

**तन्तुवाय** त्रि॰ तन्तून् वयति वे—अण् उप॰ स॰। १तन्तुवयनकर्त्तरि (ताँति) २लूतायां कीटभेदे च अमरः। ३सङ्कीर्णजातिभेदे पुंस्त्री। स्त्रियां जातित्वात् ङीष्। सा च जातिस्तद्वृत्तिश्च मानवोक्ता यथा "नृपायां वैश्यसंसर्गादायोगव इति स्मृतः। तन्तुवाया भवन्त्येव वसुकांस्योपजीविनः। शीलकाः केचित्तत्रैव जीवनं वस्त्रनिर्मितौ" "तन्तुवायो दशपलं दद्यादेकपलाधिकम्" मनुः।

**तन्तुवायदण्ड** पु॰ तन्तोर्वायस्य दण्डः ६त॰ वायते अनेन करणे—घञ् वा कर्म्म॰। वेमनि तन्तुवायसाधने दण्डे। (नराज)

**तन्तुविग्रहा** स्त्री तन्तवो विग्रहे यस्याः। कदल्याम् त्रिका॰। तत्त्वचि हि बहुसूत्राणि प्रादुर्भवन्ति।

**तन्तुशाला** स्त्री तन्तूनां वयनाय शाला। (ताँतघर) तन्तुवयनगृहे हेम॰। [(सिँओयान) अमरः।

**तन्तुसन्तत** त्रि॰ तन्तुभिः सन्ततं व्याप्तम्। स्यूतवस्त्रे।

**तन्तुसार** पु॰तन्तव इव सारो मज्जास्य। गुवाकवृक्षे। त्रिका॰

**तन्त्र** न॰ तन्यते तनोति वा कर्त्रादौ यथायथं ष्ट्रन् तन्त्रि-कुटम्बभरणे घञ् वा। १कुटुम्बभरणादिकृत्ये २सिद्धान्ते ३औषधे ४प्रधाने ५परिच्छदे ६वेदशाखाभेदे ७हेतौ ८उभयार्थकप्रयोगे। ९इतिकर्त्तव्यतायाञ्च मेदि॰। १०तन्तुवाये शब्दमाला ११राष्ट्रे १२परच्छन्दानुगमने १३स्वराष्ट्रचिन्तायाम् हेमच॰। १४प्रबन्धे शब्दरत्ना॰ १५शपथे, धरणिः १६धने १७गृहे १८वयनसाधने (ताँत) १९ कुले च नानार्थमञ्जरी। २०शिवाद्युक्तशास्त्रभेदे तल्लक्षणभेदादिकं यथा "सर्गश्च प्रतिसर्गश्च मन्त्रनिर्णय एव च। देवतानाञ्च संस्थानं तीर्थानाञ्चैव वर्णनम्। तथैवाश्रमधर्मश्च विप्र संस्थानमेव च। संस्थानञ्चैव भूतानां यन्त्राणाञ्चैव निर्णयः। उत्पत्तिर्विबुधानाञ्च तरूणां कल्पसंज्ञितम्। संस्थानं ज्योतिषाञ्चैव पुराणाख्यानमेव च। कोषस्य कथनञ्चैव व्रतानां परिभाषणम्। शौचाशौचस्य चाख्यानं नरकाणाञ्च वर्णनम्। हरचक्रस्य चाख्यानं स्त्रीपुंसोश्चैव लक्षणम्। राजधर्मो दानधर्मो युगधर्मस्तथैवच। व्यवहारः कथ्यते च तथा चाध्यात्मवर्णनम्। इत्यादिलक्षणैर्युक्तं तन्त्रमित्यभिधीयते"। तस्य प्रशंसा। "विष्णुर्वरिष्ठो देवानां ह्रदानामुदधिर्यथा। नदीनाञ्च यथा गङ्गा पर्वतानां हिमालयः। अश्वत्थः सर्ववृक्षाणां राज्ञामिन्द्रो यथा वरः। देवीनाञ्च यथा दुर्गा वर्णानां ब्राह्मणो यथा। तथा समस्तशास्त्राणां तन्त्रशास्त्रमनुत्तमम्। सर्वकामप्रदं पुण्यं तन्त्रं वै वेदसम्मितम्। कीर्त्तनं देवदेवस्य हरस्य मतमेव च। पावनं श्रद्दधानानामिह लोके परत्र च"। तस्य श्लोकसंख्या यथा "न शक्यं विस्तराद्वक्तुमपि वर्षशतैरपि। संक्षेपाद्वै प्रवक्ष्यामि लोककल्पोक्तवर्त्मना। दिवि देवि! नवलक्षं पाताले ब्रह्मशासने। लक्षमात्रं भारते च क्षितौ तन्त्राणि यानि च। आगमं त्रिविधं प्रोक्तं चतुर्थमैश्वरं स्मृतम्। कल्पश्चतुर्विधः प्रोक्त आगमो डामरस्तथा। यामलञ्च तथा तन्त्रं तेषां भेदाः पृथक् पृथक्। कुलकाख्यं सप्रपञ्चम् सारदाख्यञ्च नारदम्। महार्णवश्च कपिलो योगः कल्पः कपिञ्जलः। अद्भुत शुद्धिर्वीरश्च सिद्धसंवरणस्तथा। प्रथमोऽष्टसहस्रन्तु श्लोका दश प्रकीर्त्तिताः। द्वितीयो कुलकस्तत्र षट्सहस्राणि संख्यया। श्लोकाः शतार्द्धसंख्यातास्तृतीयस्त्रिसहस्रकः। शतद्वयं साधिकञ्च श्लोकानां पञ्चविंशतिः। त्रिंशो, त्तरसहस्राणि श्लोकानां भानुसंख्यया। प्रपञ्चः प्रथमे तन्त्रे द्वितीये वसुसंख्यया। सहस्राणि तथा श्लोकाः सप्तविंशतिसंख्यया। भूतनेत्रसहस्राणि तृतीयेऽब्धिसहस्रकम्। शतद्वयं पङ्क्ति १० श्लोकाः प्रपञ्चः कथितस्त्रिधा। कला १६संख्या सहस्राणि सारदायाः प्रकीर्त्तिताः। पञ्चविंशाधिकाः श्लोका वसुश्लोकाश्च नारदे। विंशतिश्च सहस्राणि षट्सहस्राणि संख्यया। वसुश्लोकाश्च कथिताः